## सप्तदशः पाठः

# विद्वल्लक्षणम्



अयं नाट्यांशः 'मालविकाग्निमित्रम्' इत्यस्मात् नाटकात् गृहीतः। नाटकमिदं महाकविकालिदासः रचयामास। अस्मिन् नाटके पञ्च अङ्काः सन्ति। प्रस्तुतांशः प्रथमाङ्कात् गृहीतोऽस्ति। अंशेऽस्मिन् द्वयोः नाट्याचार्ययोः स्वप्रतिभाम् आधृत्य विवादः संलक्ष्यते। तदा परिव्राजिका राज्ञः आदेशानुसारं विवादं समाधातुं प्रयत्नं करोति।

**( सर्वे उपविशन्ति )**

**अग्निमित्रः ( राजा )** – भगवति! अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसङ्घर्षिणोर्भगवत्या प्राश्निकपदम् अध्यासितव्यम्।

**कौशिकी ( परिव्राजिका )** – (सस्मितम्) अलमुपालम्भेन। पत्तने सति ग्रामे रत्नपरीक्षा?

**राजा** – नैतदेवम्। पण्डिताकौशिकी खलु भगवती, पक्षपातिनावहं देवी च।

**गणदासहरदत्तौ ( आचार्यौ )** – सम्यगाह देवः। मध्यस्था भगवती, नौ गुणदोषतः परिच्छेत्तुमर्हति।

**राजा** – तेन हि प्रस्तूयतां विवादः।

**परिव्राजिका** – देव! प्रयोगप्रधानं हि नाट्यशास्त्रम्। किमत्र वाग्व्यवहारेण। कथं वा देवी मन्यते।

**धारिणी ( देवी )** – यदि मां पृच्छसि तदैतयोर्विवाद एव न मे रोचते।

**गणदासः** – देवि! न मां समानविद्यया परिभवनीयमवगन्तुमर्हसि।

**गौतमः ( विदूषकः )** – भवति! पश्याम उदरम्भरिसंवादम्। किं मुधा वेतनदानेनैतेषाम्?

**देवी** – ननु कलहप्रियोऽसि।

**विदूषकः** – मैवम् चण्डि! अन्योन्यकलहप्रिययोर्मत्तहस्तिनोरेकतरस्मिन्ननिर्जिते कुत उपशमः?

**राजा** – ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती।

**परिव्राजिका** – अथ किम्?

**राजा** – तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम्।

**परिव्राजिका** – तदेव वक्तुकामास्मि–

**शिलष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव॥**

**विदूषकः** – श्रुतमार्याभ्यां भगवत्या वचनम्। एष पिण्डितार्थ उपदेशदर्शनान्निर्णय इति।

**हरदत्तः** – परमभिमतं नः।

**गणदासः** – देवि! एवं स्थितम्।

देवी – यदा पुनर्मन्दमेधा शिष्या उपदेशं मलिनयन्ति तदाऽऽचार्यस्य न दोषः।

राजा – देवि! एवमापठ्यते। 'विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयतीति।'

देवी – (आत्मगतम्) (गणदासं विलोक्य, जनान्तिकम्) कथमिदानीम्। अलमार्यपुत्रस्योत्साहकारणं मनोरथं पूरयित्वा। विरम निरर्थकादारम्भात्।

विदूषकः – सुष्ठु भवती भणति। भो गणदास! सङ्गीतपदं लब्ध्वा सरस्वत्या उपायनमोदकान् खादतः किं ते मुखनिग्रहेण विवादेन।

गणदासः – सत्यम्, अलमेवार्थो देवीवाक्यस्य। श्रूयताम् अवसरप्राप्तमिदानीम्–

**लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेणनिन्दाम्।**

**यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति॥**

देवी – अचिरोपनीता ते शिष्या। अपरिनिष्ठितस्योपदेशस्य पुनरन्याय्यं प्रकाशनम्।

गणदासः – अत एव मे निर्बन्धः।

देवी – तेन हि द्वावपि भगवत्यै उपदेशं दर्शयतम्।

(इति निष्क्रान्ताः सर्वे)

## शब्दार्थः

| | | |
|---|---|---|
| उपालम्भेन | – | उपालम्भपूर्वकेन (उलाहना के द्वारा) |
| पत्तने | – | नगरे (नगर में) |
| नौ | – | आवयोः (हम दोनों के) |
| परिच्छेत्तुम् | – | विभाजयितुम् (विभाग करने के लिए) |
| परिभवनीयम् | – | पराजेतुम् (पराजय करने के लिए) |
| उदरम्भरिसंवादम् | – | उदरपूर्तिमात्रसंवादम् (पेट भरने के लिए बोलना) |
| मुधा | – | व्यर्थम् (व्यर्थ से) |
| कलहः | – | कलह |
| उपशमः | – | शान्तिः (शान्ति) |
| प्रत्याययितव्यम् | – | विश्वासयितव्यम् (विश्वास कराने योग्य) |
| श्लिष्टा | – | युक्ता (चिपका) |
| सङ्क्रान्तिः | – | सङ्क्रमणम् |
| धुरि | – | श्रेष्ठ |
| प्रतिष्ठापयितव्यः | – | सम्मानयितव्यम् (प्रतिष्ठा प्राप्त करानी चाहिए) |
| जनान्तिकम् | – | जनम् अपवार्य (पात्रों से दूर) |

| | | |
|---|---|---|
| सुष्ठु | - | साधु (सही) |
| भणति | - | वदति (बोलता है) |
| उपायनमोदकान् | - | मोदकरूप प्रतिफलानि (मोदक रूप प्रतिफलों को) |
| मुखनिग्रहेण | - | मुखबन्धनेन (मुँह बन्द करने से) |
| लब्धास्पदः | - | पदप्राप्तः (पद प्राप्त किया हुआ) |
| ज्ञानपण्यम् | - | ज्ञानविक्रेतारम् (ज्ञान को बेचने वाला) |
| यस्यागमः | - | यस्यअध्ययनम् (जिसका पठन) |
| वणिजम् | - | व्यापारिणम् (बनिया) |
| अपरिनिष्ठितस्य | - | अपरिपक्वस्य (अल्पज्ञ का) |
| निर्बन्धः | - | बन्धरहितः (स्वतन्त्रः) (बन्धन से रहित) |
| निर्णयाभ्युपगमः | - | निर्णयं प्रति गमनम् (निर्णय पर पहुँचना) |

## अभ्यासः

**1. एकपदेन उत्तरत-**

क) विद्वल्लक्षणम् नाट्यांशस्य नायकः कः?

ख) अग्निमित्रस्य राज्ञी का?

ग) विदूषकस्य नाम किम्?

घ) प्रयोगप्रधानं किम्?

ङ) गौतमः कः?

च) चण्डि इति कस्याः विशेषणम्?

**2. एकवाक्येन उत्तरत-**

क) विवादः कयोर्मध्ये संवृत्तः?

ख) विवादस्य निर्णायिका का आसीत्?

ग) पक्षिपातिनौ कौ?

घ) विद्वल्लक्षणम् पाठ्यांशे कति नायकाः सन्ति?

ङ) प्राश्निकपदं का अलङ्कृतवती?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत-**

क) विवादः कः?

ख) गणदासः किम् उक्तवान्?

ग) कौशिक्याः अभिप्राये विद्वान् कः?

घ) वणिक् कः?

ङ) विवादस्य निर्णयः कः?

4. **नामोल्लेखपुरस्सरं सन्धिविच्छेदं कुरुत–**

क) तदैतयोः

ख) तदिदानीम्

ग) सङ्क्रान्तिः

घ) नैतत्

ङ) एतन्नायम्

च) पक्षपातिनावहम्

5. **योजयित्वा सन्धिं लिखत–**

क) दर्शनात् + निर्णयः

ख) परम् + अभिमतम्

ग) मा + एवम्

घ) निः + बन्धः

ङ) सम्यक् + आह

च) प्रियः + असि

6. **विग्रहवाक्यपुरस्सरं समासं लिखत–**

क) अचिरोपनीता

ख) विज्ञानसङ्घर्षिणः

ग) विद्वल्लक्षणम्

घ) रत्नपरीक्षा

ङ) बुद्धिलाघवम्

च) नाट्याचार्यः

7. **उचितं योजयत–**

| | अ | ब |
|---|---|---|
| क) | राजा | विदूषकः |
| ख) | परिव्राजिका | गणदासः |
| ग) | आचार्यः | राज्ञी |
| घ) | धारिणी | अग्निमित्रः |
| ङ) | गौतमः | कौशिकी |

**8. रिक्तस्थानानि पूरयत-**

क) पत्तने सति ग्रामे................।

ख) पश्याम................। किं मुधा वेतनदानेन

ग) विनेतुरद्रव्य................बुद्धिलाघवं प्रकाशयति।

घ) ................ते शिष्याः।

ङ) ................हि नाट्यशास्त्रम्।

**9. श्लोकान् पूरयत-**

क) लब्धास्पदो................वदन्ति॥

ख) श्लिष्टा क्रिया.............एव॥

**10. मूलशब्दं विभक्तिं वचनं च लिखत-**

| | | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| क) | आर्य! | .................... | ...................... | ...................... |
| ख) | शिष्याः | .................... | ...................... | ...................... |
| ग) | भवती | .................... | ...................... | ...................... |
| घ) | सङ्गीतपदम् | .................... | ...................... | ...................... |
| ङ) | सरस्वत्या | .................... | ...................... | ...................... |
| च) | परिव्राजिके | .................... | ...................... | ...................... |
| छ) | मां | .................... | ...................... | ...................... |

## योग्यताविस्तारः -

- मालविकाग्निमित्रस्य सम्पूर्णां कथां जानन्तु।
- कालिदासस्य अन्यानि नाटकानि कानि। पठत।
- श्लिष्टा क्रिया..........इत्यादि शिक्षाप्रदान् श्लोकान् चिनुत।